Cover Page

DOI: http://ijmer.in.doi./2022/11.11.19
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2022); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:11, ISSUE:11(1), November: 2022
Online Copy of Article Publication Available (2022 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd November 2022
Publication Date:10th December 2022
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

# भाषाविज्ञाने ध्वनिविज्ञानस्य वैशिष्ठयम्

सचिन शर्मा(शोध छात्र)
केन्द्रिय संस्कृत विश्वविद्यालय
वेद व्यास परिसर, बलाहर, जि. कागँड़ा(हि.प्र.)

इहलोके मनुष्यः ईश्वरस्य सर्वोत्कृष्टरचना। मनुष्यः स्वविचारात्मकक्षमतया स्वसुगमतायै समाजस्य निर्माणं करोति। आदिकालाद् हि मनुष्यः एकः सामाजिकप्राणी अस्ति। स समाजस्य निर्माणं कृत्वा वस्तुमिच्छति। समाजे निवासकारणाद् हि मनुष्यः अन्यैः सह सम्पर्कं विदधाति। सः स्वविचारान् अन्यान् जनान् प्रेषयति अपि च अन्येषां जनानां विचारान् अवगन्तुं प्रयतते। इदं सर्वकार्यं भाषायाः माध्यमेन हि सम्भवति।

स्वभावान् प्रस्तुतकर्तुं मनुष्यः यत् सार्थकमौखिकसाधनस्य प्रयोगं करोति, तत् वर्तते भाषा। यद्यपि लोके सङ्केतादिप्रयोगेन अपि भावानाम् अभिव्यक्तिः सम्भवति। तद्यथा- पताकाप्रदर्शनम्, हस्तेन सङ्केतकरण- स्पर्शनेन इतरान् प्रति स्वविचारसम्प्रेषणम्। उदाहरणार्थ गार्डः रक्तपताकां दर्शयित्वा रेलयानस्य अवरोधस्य, हरितपताकां च संदर्श्य रेलयानस्य प्रस्थानस्य च आदेशं ददाति। मूकबधिराः मौनव्रतिनो जनाश्च हस्तसंकेतैः स्वविचारान् प्रकट्यन्ति। चौराः गुप्तचराश्च स्वसहयोगीनां हस्तं सुष्ठु संस्पृश्य आवश्यकान् निर्देशान् प्रयच्छन्ति। परन्तु विचारप्रकटनस्य एतानि साधनानि संक्षिप्तानि सीमितानि च वर्तन्ते।

स्वभावानां सूक्ष्मस्पष्टीकरणाय भाषा सकलसाधनं वर्तते। भाषा मानवजीवनस्य अनिवार्यमुपकरणमस्ति। तदभावे मानवजीवनस्य विकासप्रक्रिया अपूर्णैवास्ति। अन्यशब्दैः इदमपि वक्तुं शक्यते यत् भाषा मानवसमाजस्य सापेक्षवस्तु वर्तते। अत एव मानवजीवनेन सह भाषायाः धनिष्ठः सम्बन्धः अस्ति।

भाषा मानवजीवने यत् जीवनज्योतिः वर्तते, सा मानवस्य अन्यैः सह सम्बन्धस्थापनं करोति। मानवस्य विचारं हि तस्य समाजेन सम्पर्कस्थापनं करोति। तथैव सम्पर्कस्थापनं भाषामाध्यमेन हि सम्भवति। भाषा वस्तुतः मानवशरीरे दैव्यांशः वर्तते, यः इहलोके केवलमेव मनुष्यमात्रान् हि प्राप्तोऽस्ति। भाषारूपी दिव्यज्ञानज्योतिः स्वप्रकाशेन समस्तलोकान् प्रकाशितान् करोति। यदि भाषारूपीसकलसाधनम् इहलोके न भवति, तर्हि लोके अज्ञानान्धकारं हि केवलमेव भवेत्।

भाषामाध्यमेन हि मनुष्यः संसारस्य सर्वोत्तमजीवः वर्तते। वाग्व्यवहारेण हि मनुष्यः समस्तक्षेत्रेषु स्व प्रभुत्वस्थापनं करोति। भाषा हि तत् दिव्यज्ञानज्योतिः वर्तते, यत् मानवान् ऋषि-देवताश्च कृणोति।

Cover Page

DOI: http://ijmer.in.doi./2022/11.11.19
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2022); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:11, ISSUE:11(1), November: 2022
Online Copy of Article Publication Available (2022 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd November 2022
Publication Date:10th December 2022
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

**भाषाविज्ञानम् -** सर्वप्रथम भाषाशब्दः संस्कृतभाषायाः भाष् धातोः टाप्- प्रत्यययोगेन निष्पद्यते। अस्यार्थः वर्तते- भाषणम्, कथनम्, व्यक्तनञ्च। अर्थात् भाषा सा उच्यते, या भाष्येत्, अर्थात् यया भाषणम्, व्यक्तनम् अथवा कथनं भवेत्। महर्षिपाणिना इदमपि स्पष्टीकृतम्- "भाष्यते व्यक्तवाग्-रूपेण अभिव्यज्यते इति भाषा।" अर्थात् व्यक्तवाण्याः रूपेण यस्याः अभिव्यक्तिः भवेत् सा भाषा अभिधीयते। 'वि' उपसर्गपूर्वकं 'ज्ञा' धातो निष्पन्नं विज्ञानम्। विज्ञानशब्दस्य अर्थो वर्तते 'विशिष्टज्ञानम्'। विषयस्य विशेषज्ञानं हि विज्ञानं वर्तते। विज्ञानशब्दस्य आशयः व्यवस्थितज्ञानेन वर्तते। विज्ञानावलोकनेन विषयस्य प्राकृतिक- सिद्धान्तानां विशिष्टज्ञानं जातः। सूक्ष्मातिसूक्ष्ममध्ययनं विज्ञानस्य मुख्यप्रयोजनं वर्तते। सामान्यतः विशिष्टज्ञानं प्रति अवगमनं विज्ञानस्य मुख्यसिद्धान्तं वर्तते। अत एव भाषायाः विशिष्टज्ञानं वर्तते 'भाषाविज्ञानम्'। विचाराभिव्यक्तये भाषा मुख्यसाधनं वर्तते, तस्याः व्यवस्थितं संरचनाविकासस्य च विशिष्टज्ञानं भाषाविज्ञानं वर्तते। भाषाविज्ञानस्य विषये भाषावैज्ञानिकानां मताः एवं वर्तन्ते -

डॉ० श्यामसुन्दरमहाभागः- "यस्मिन् शास्त्रे भाषोत्पत्तेः, संरचनायाः, विकासस्य, ह्रासस्य च अध्ययनं क्रियते तद् भाषाविज्ञानम् इत्यभिधीयते।"

डॉ० भोलानाथतिवारीमहाभागः- "ऐतिहासिक- तुलनात्मकाध्ययनमाध्यमेन भाषाणां प्रकृतेः, विकासपरम्परायाः भाषायिक- संरचनायाश्च विधिपूर्वकं विशिष्टाध्ययनं सिद्धान्तनिर्धारणं च भाषाविज्ञानम् इत्युच्यते।"

डॉ० बाबूराम सक्सेनामहाभागः- "भाषाविज्ञानस्य अभिप्रायः भाषायाः विश्लेषणेन तस्याः दिग्दर्शनं भवति।"

प्रो० देवेन्द्रनाथ शर्मामहाभागः- "भाषाविज्ञानस्य स्पष्टार्थं वर्तते भाषायाः विज्ञानम्, तथा च विज्ञानं वर्तते विशिष्टज्ञानम्, अत एव भाषायाः विशिष्टज्ञानं भाषाविज्ञानम् इत्युच्यते।"

डॉ० कपिलदेव द्विवेदीमहाभागः- "भाषाया यत्तु विज्ञानं सर्वाङ्गव्याकृतात्मकम् । विज्ञानदृष्टिमूलं तद् भाषाविज्ञानमुच्यते।"

डॉ० मंगलदेवशास्त्रीमहाभागः- "यस्मिन् शास्त्रे सामान्यतः मानवीयभाषायाः, विशेषभाषायाः रचनायाः इतिहासस्य, अपि च प्रादेशिकभाषाणां वर्गाणां पारस्परिक- समानता- विशेषतायाः तुलनात्मकाध्ययनम् अभिधीयते तद् भाषाविज्ञानम् इत्युच्यते।"

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2022); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:11, ISSUE:11(1), November: 2022
Online Copy of Article Publication Available (2022 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd November 2022
Publication Date:10th December 2022
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
Cover Page
DOI: http://ijmer.in.doi./2022/11.11.19
www.ijmer.in

डॉ० देवीशंकरद्विवेदी महाभागः- “भाषायाः विज्ञानं भाषिकी इत्युच्यते, भाषिकीविज्ञाने च भाषायाः वैज्ञानिकविवेचनं विद्यते।”

उपर्युक्त परिभाषाभिः स्पष्टमस्ति यत् भाषाविज्ञाने भाषायाः केवलमेव सामान्याध्ययनं हि न विद्यते, अपितु भाषायाः प्रकृति- विकास- संरचना- परिवर्तनादि समस्तसिद्धान्तानां विशिष्टाध्ययनं विद्यते। अत एव निष्कर्षरूपेण वक्तुं शक्यते यत् मानवीयभाषायाः समस्तपक्षाणां विवेचनं भाषाविज्ञाने विद्यते। भाषाविज्ञानं तु तद् विज्ञानमस्ति, यस्मिन् अनेकेषां प्राचीननाम्, अर्वाचीनानां च भाषाणां, तेषाम् अवयवानां च सांगोपांगम् अध्ययनं विधिविशेषम् आश्रित्य क्रियते।

भाषायाः संरचना, ध्वन्यात्मकप्रवृतिः, पदसंरचना, पदानामुत्पत्तिः, रुपविकासः, अर्थविकासः, वाक्यसंरचना, ऐतिहासिकप्राचीनता, परिवर्तनशीलता, अन्याभिः भाषाभिः सह साम्यं वैषम्यञ्च भाषाविज्ञानस्य अध्ययने, सिद्धान्तप्रतिपादने सहायकाः भवन्ति। अत एव समस्तसैद्धान्तिकविशिष्टपक्षाणां विवेचनं हि भाषाविज्ञानम्।

भाषाविज्ञानं केवलं साहित्यसम्पत्तिसमृद्धायाः भाषायाः एवाध्ययनं न करोति, अपितु साहित्यिकसम्पत्तिविरहितायाः अपि भाषायाः वैज्ञानिकमध्ययनं करोति। तत्र ध्वनिविज्ञान- पदविज्ञान - वाक्यविज्ञान- अर्थविज्ञानमिति भाषाविज्ञानस्य मुख्यशाखाः वर्तन्ते।

**(१). ध्वनिविज्ञानम्-** मानवीयभाषायाः अध्ययनस्य प्रमुखो विषयो ध्वनिः विद्यते। समस्ताभाषाः ध्वन्यश्रिता वर्तन्ते। अत एव भाषाविज्ञाने ध्वन्याध्ययनस्य स्थानं महत्त्वपूर्णं वर्तते। ध्वनिविज्ञाने मानवशरीरस्य उच्चारणोपयोगिनाम् अवयवानां परिचयः क्रियते। तदनन्तरं ध्वनीनाम् उच्चारणस्थानस्य, उच्चारणप्रयत्नस्य दृष्ट्यापि वर्गीकरणं क्रियते। तदनन्तरमिदमपि विचार्यते यत् तेषां ध्वनीनां कदा- कदा, केन- केन च प्रकारेण विकासः सञ्जातः? तानेव ध्वनिविकासान् आश्रित्य केचन निश्चिताः ध्वनिनियमा अपि स्वीक्रियन्ते। अत एव ध्वनिविज्ञानस्य इमे विषयाः सन्ति- उच्चारणावयवाः, ध्वनीनां वर्गीकरणम्, ध्वनिविकाराणां निर्देशः, तेषां करणानि, ध्वनिनियमाश्च।

**(२). पदविज्ञानम्-** पदपदार्थं निरूपयता महर्षिणा पाणिनिना अभिहितम् - ‘सुप्तिङन्तं पदम्’। तथाविधाः वर्णाः पदशब्देनाभिधीयन्ते, येषां वर्णसमूहानामन्ते सुप्- विभक्तीनाम् अथवा तिङ्- विभक्तीनां संयोगो भवति। आचार्यविश्वनाथेन अपि अभिहितम्- “वर्णाः पदं

Cover Page

DOI: http://ijmer.in.doi./2022/11.11.19
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2022); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:11, ISSUE:11(1), November: 2022
Online Copy of Article Publication Available (2022 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd November 2022
Publication Date:10th December 2022
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

प्रयोगार्हानन्वितैकार्थबोधकाः” इति। अस्मिन् पदविज्ञाने नाना विधानां पदानामध्ययनं क्रियते। यथा- संज्ञा- सर्वनाम- क्रिया- क्रियाविशेषणादिकानां धातुरूपाणाम्, शब्दरूपाणाम् इति। अनेन एव साकम् अस्मिन् विज्ञाने पदानां मूलम्, व्युत्पत्तिः, वाक्येषु प्रयोगाः, पदानां काले-काले सञ्जातं रूपपरिवर्तनम्, प्रयोगेषु देशकालानुसारेण विकारादिकाः विवेच्यन्ते। पदानि एव भाषायाः मूलभूतानि सन्ति। अत एव पदविज्ञानं भाषाविज्ञानस्य मूलभूतं विद्यते।

३. **वाक्यविज्ञानम्-** अनेकेषां सार्थकानाम् अन्वितानां च पदानां समूहो वाक्यमित्यभिधीयते। वाक्यस्य स्वरूपं निरूपयता आचार्येण विश्वनाथेन अभिहितम्- “वाक्यं स्याद् योग्यता-आकांक्षासत्तियुक्तः पदोच्चयः” इति। अयमाशयो यत् पदानां समूह एव वाक्यमित्यभिधीयते, परन्तु तस्मिन् पदसमूहे वैशिष्ट्यम् अत्र अपेक्षितं भवति वाक्यत्वाय- योग्यता, आकाङ्क्षा, आसत्तिश्च। योग्यानां पदानां समूहो वाक्यम् अभिधीयते। यथा अग्नेः योग्यता दाहक्रियायाम् अस्ति, न तु सिञ्चनक्रियायाम्। अत एव ‘अग्निना सिञ्चतीति’ वाक्यं न भवितुम् अर्हति, अपितु जलेन सिञ्चतीत्येव वाक्यम्। अनेनैव प्रकारेण साकांक्षाणामेव पदानां समूहो वाक्यम् इत्यभिधीयते, न तु निराकांक्षाणाम्। यथा ‘रामो गच्छतीत्येव’ वाक्यम्, न तु ‘रामः, श्यामः, मोहनः’ इति पदानां समूहो वाक्यं भवितुमर्हति, एतेषां पदानां आकांक्षारहितत्वात्।

अनेन एव प्रकारेण पदेषु वाक्यत्वाय आसत्तिः अपि आवश्यकम्। सा आसत्तिः अपि द्विप्रकारवती भवति- कालकृतासत्तिः, स्थानकृतासत्तिः च। अत एव वाक्यविज्ञानं भाषाविज्ञानस्य सा शाखा वर्तते, यस्या अध्ययनेन वाक्यनिर्माणस्य समस्तपक्षाणां विश्लेषणं ज्ञायते। अत्र वाक्यानाम् ऐतिहासिकं तुलनात्मकम् अध्ययनमपि विद्यते।

४. **अर्थविज्ञानम्-** शब्दार्थयोः शब्दविदः अभेदसम्बन्धं स्वीकुर्वन्ति। सर्वे शब्दाः सार्थकाः भवन्ति। मानवाः तेषां तेषां शब्दाणाम् अर्थमवबोधयन्ति, तेषां शब्दानां प्रयोगं हि कुर्वन्ति। निरर्थकानां शब्दानाम् उच्चारयिता विक्षिप्त इति अभिधीयते। गौः शब्दस्य प्रयोगः गोत्वावच्छिन्नायाः व्यक्तेः बोधनायैव क्रियते। इत्थं ज्ञायते यत् यदि शब्दाः शरीरभूतास्मन्ति, तदा अर्थाः तेषामत्मभूताः। येन प्रकारेणात्मानं बिना शरीरं नाशयति, तेन प्रकारेण शब्दानाम् अपि सार्थकता अर्थैः एव भवति।

अत एव अर्थविज्ञानमपि भाषाविज्ञानस्य अतीव महत्त्वपूर्णमङ्गं वर्तते। अर्थविज्ञाने शब्दानाम् अर्थनिर्धारणस्य प्रक्रिया अधीयते। कालक्रमेण कस्य शब्दस्य अर्थे केन प्रकारेण परिवर्तनं

Cover Page

DOI: http://ijmer.in.doi./2022/11.11.19
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2022); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:11, ISSUE:11(1), November: 2022
Online Copy of Article Publication Available (2022 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd November 2022
Publication Date:10th December 2022
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

सञ्जातमित्यपि विचार्यते अर्थविज्ञाने। यथा अभियुक्तशब्दस्य प्रयोगः प्राचीनकाले प्रमाणिकपुरुषरूपस्य अर्थस्य बोधनाय क्रियते स्म, किन्तु वर्तमानकाले तस्य शब्दस्य प्रयोगः पुरतः पुरुषस्य बोधनाय क्रियते।

इत्थं शब्दानाम् अर्थपरिवर्तनानि तेषामर्थपरिवर्तनानां कारणानि प्रभृतयो विषयाः अर्थविज्ञानस्य विषयाः सन्ति।

## भाषाविज्ञाने ध्वनिविज्ञानस्य अर्थः

भाषाविज्ञाने ध्वनिविज्ञानस्य महत्त्वपूर्णस्थानमस्ति। अस्य सम्बन्धः भाषायाः भौतिकाधारध्वनिना अस्ति। मनुष्यस्य मुखाद् निःसृतशब्दध्वनीनां विस्तृतमध्ययनं ध्वनिविज्ञाने क्रियते। कर्णेन श्रूयमाणं कमपि शब्दं ध्वनिमिति कथयन्ति। भाषाविज्ञानान्तर्गतं भाषया सम्बद्धं सार्थकं शब्दं ध्वनिः इति आहुः। भाषाविज्ञानस्य अन्तर्गतं यावत्कार्यमस्मिन् क्षेत्रे जातं तावदन्यत्र कस्मिन्नपि क्षेत्रे नैव समभूत्।

आङ्ग्लभाषायां ध्वनिविज्ञानकृते 'फोनोलॉजी' (Phonology) एवं 'फोनेटिक्स' (Phonetics) इति शब्दौ प्रचलितौ। अस्य उद्भवः ग्रीकभाषायाः 'फोन' (Phone) इति शब्देन प्रभवति। फोनशब्दस्य अर्थं वर्तते 'ध्वनिः'। शब्दोऽयं संस्कृतभाषायाः 'भण्' धातुरूपस्य परिवर्तितरूपं भवति। ग्रीकभाषायां संस्कृतभाषायाः चतुर्थवर्णस्य द्वितीयवर्णे प्रयोगो भवति। अत एव भकारस्य फकारो भवति। सामान्यतः 'फोनोलॉजी' (Phonology) एवं 'फोनेटिक्स' (Phonetics) इत्ययोः शब्दयोः अर्थः समानेव वर्तते, परन्तु प्रयोगदृष्ट्या द्वयोरेव कार्यं भिन्नं-भिन्नं वर्तते। 'फोनेटिक्स' (Phonetics) शब्दान्तर्गते ध्वनिपरिभाषायाः, ध्वनिप्रयोगस्य, ध्वन्याङ्गानां विश्लेषणस्य, वर्गीकरणस्य, स्वरूपस्य च अध्ययनं क्रियते। 'फोनोलॉजी' (Phonology) भागान्तर्गते ध्वनेः विशेषता- इतिहास- परिवर्तनस्य च अध्ययनं क्रियते। संस्कृतभाषायां 'ध्वन्' धातोः ध्वनिशब्दः विनिर्मितोऽस्ति। ध्वनिः द्विधा वर्तते- भाषाध्वनिः, ध्वनिग्रामश्च। भाषाविज्ञाने ध्वनिशब्दः सामान्यध्वनिभ्यः भिन्नत्वेनावबोधयितुं 'भाषाध्वनिः' इति कथ्यते। भाषाध्वनिं परिभाषमाणः 'डॉ॰सुनीति कुमार चटर्जी महाभागः' लिखति यत्- "मानवीयध्वनियन्त्रेण उत्पादितः तथा सुनिश्चित श्रवणगुणैर्युक्तः ध्वनिः भाषाध्वनिरिरिति उच्यते।"

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2022); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:11, ISSUE:11(1), November: 2022
Online Copy of Article Publication Available (2022 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd November 2022
Publication Date:10th December 2022
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2022/11.11.19
www.ijmer.in

**डॉ० भोलानाथ तिवारीमहाभागः** भाषाध्वनेः परिभाषाम् इत्थं कृतवान्- "भाषाध्वनिः स ध्वनिः यं मनुष्यः स्वमुखस्य नियतस्थानात् निश्चितप्रयत्नद्वारा किमपि ध्येयं स्पष्टयितुम् उच्चरेत् श्रोता च यं तस्मिन्नेवार्थे गृह्णीयात्।"

**डॉ० कपिलदेवद्विवेदीमहाभागानुसारेण-** "ध्वनेर्विश्लेषणं शिक्षा वर्णनं च विभाजनम्। परिवृत्यादीतिहासश्च ध्वनिविज्ञानमुच्यते।।"

**डॉ० मंगलदेवशास्त्रीमहाभागः** ध्वनिविज्ञानस्य परिभाषा वर्णविज्ञाननाम्ना कृतवान् तद्यथा- "वर्ण-विज्ञानशब्देन स्पष्टयति यत् वर्णस्य विज्ञानं वर्णविज्ञानम्। साधारणदृष्ट्या वर्णविज्ञाने सामान्यतः मानवीयभाषायाः ध्वनि- वर्णविचारणम् तथा वर्णस्वरूप-इतिहासस्य च विचारः क्रियते। विशेषदृष्ट्या वर्णविज्ञाने वर्णोच्चारणपयोगी शरीरावयवद्वारा वर्णानाम् उच्चारणम् सूक्ष्मातिसूक्ष्मविवेचनं च विद्यते"।


अत एव भाषाध्वनिः भाषायाः मूलाधारः वर्तते। ध्वनिसाहाय्येन शब्द (पद) निर्माणं भवति, पदसाहाय्येन च वाक्यनिर्माणं भवति। सामान्यतः वाक्यप्रयोगो हि भावाभिव्यक्त्यै प्रत्येकभाषायां क्रियते। अत एव पदविज्ञान- वाक्यविज्ञान- अर्थविज्ञानम् तुल्यः ध्वनिविज्ञानैः अपि भाषाविज्ञानस्य प्रधानाङ्गं वर्तते। भाषारूपीभवनस्य मूलाधारः वर्तते ध्वनिविज्ञानम्। अत एव अन्येषु अङ्गेषु ध्वनिविज्ञानस्य स्थानं श्रेष्ठं वर्तते भाषाविज्ञाने।

## ध्वनीनां वर्गीकरणम्-

ध्वनेः प्रधानाङ्गानि उच्चारणस्थानानि प्रयत्नाश्च सन्ति। स्थान-प्रयत्नानाम् उच्चारण- अवयवैः विशिष्टः सम्बन्धो भवति। ध्वनेः आवश्यकानि एवमनिवार्य-उपकरणानि उच्चारणस्य अवयवाः भवन्ति। एते उच्चारण- अवयवाः ध्वनियन्त्राणि अपि कथ्यन्ते। ध्वनेः उत्पत्तिमवबोधनाय आवश्यकमस्ति यत् मानवशरीरस्थं ध्वनियन्त्रस्वरूपस्य ज्ञानम्। तदेव अनेन विद्यन्ते-

१.नासिका-विवरम् २. अधरोष्ठः ३. ऊर्ध्वर्वोष्ठः ४. ऊर्ध्वर्वदन्ताः ५. अधोदन्ताः ६. वतर्सः ७. तालुः ८. अलिजिह्वम् ९. मुखविवरम् १०. जिह्वाग्रम् ११. जिह्वापश्चभागः १२. जिह्वामध्यः १३. जिह्वामूलम् १४. ग्रसनिकायाः पश्यभागः १५. ग्रसनिका १६. स्वरयन्त्र मुखावरणम् १७. स्वरतन्त्र्यः १८. काकलः १९. स्वरयन्त्रम् २०. श्वासनलिका २१. मूर्धा २२. भोजननलिका २३. फुफ्फुसः।

उपर्युक्तागानां समूह एव ध्वनियन्त्रनाम्ना अथवा वाग्यन्त्राभिधानेन अभिधीयते। एतेषामेव पारस्परिकसंयोगेन विभिन्न भाषिक- ध्वनीनाम् उत्पत्तिः भवति। स्थान- प्रयत्न- करणैः एव मानववाग्यन्त्रम् निर्मितं सम्भवति। इमे सर्वे एव सम्मिलितरूपेण ध्वन्युत्पादकाः सन्ति। अत एव एभिः ध्वनेः वर्गीकरणं कर्तुं शक्यते। तद्यथा-


Cover Page

DOI: http://ijmer.in.doi./2022/11.11.19
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2022); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:11, ISSUE:11(1), November: 2022
Online Copy of Article Publication Available (2022 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd November 2022
Publication Date:10th December 2022
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf


**(क). स्थानम्-** फुफ्फुसादागच्छन् निःश्वासवायुः येन उच्चारणावयवेन स्थानेन वा बाधम् अनुभवति, तत् स्थानम् इत्युच्यते। कण्ठात् आरभ्य ओष्ठपर्यन्तं स्थानसंज्ञकाः अवयवाः सन्ति। तद्यथा- कण्ठः, तालुः, मूर्धा, दन्ताः, ओष्ठौ, नासिका, कण्ठतालुः, कण्ठोष्ठम्, जिह्वामूलञ्च ।

**(ख). प्रयत्नः-** भाषिक- ध्वनेः उच्चारणे मुखविवराद् आरभ्य कण्ठपर्यन्तः कृतः प्रयासः 'प्रयत्नः' इत्युच्यते। सद्विविधः- आभ्यन्तरप्रयत्नः, बाह्यप्रयत्नश्च।

**(1).आभ्यन्तरप्रयत्नः-** आभ्यन्तरप्रयत्नास्तु स्पृष्ट- ईषद्विवृत- विवृत- संवृतभेदेन पञ्चधा भवन्ति। यथा- १. स्पृष्टम् - स्पर्शानां वर्णानां स्पृष्टं प्रयत्नम्। २.ईषत्स्पृष्टम् - ईषत्स्पृष्टम् अन्तस्थानाम्। ३.ईषत्विवृतम्- ईषद्विवृतम् ऊष्माणाम्। ४.विवृतम्- विवृतं स्वराणाम्। ५. संवृतम्- ह्रस्वस्य अवर्णस्य प्रयोगे संवृतम्।

**(2). बाह्यप्रयत्नः-** बाह्यप्रयत्नास्तु विवार- संवार- श्वास- नाद- घोष- अघोष- अल्पप्राण- महाप्राण- उदात्त- अनुदात्त- स्वरित भेदेन एकादशधा भवन्ति।

**(ग). करणम्-** करणं नाम तादृशानाम् इन्द्रियाणां संवर्गोऽस्ति, यः ध्वन्युच्चारणे भाषिकध्वनिनिष्पत्तौ वा सहायकः भवति। स्थानकरणयोः केवलं गत्यात्मकम् अन्तरमस्ति।

## ध्वनिविज्ञानस्य वैशिष्टयम् -

भाषाविज्ञानस्य महत्त्वपूर्णम् अङ्गं वर्तते ध्वनिविज्ञानम्। ध्वनिविज्ञानेन भाषायाः विभिन्नध्वनीनां ज्ञानं सम्यक्तया क्रियते। उच्चारणसम्बधज्ञानस्य प्रतिपादनं करोति ध्वनिविज्ञानम्। वर्णानां शुद्धज्ञानस्य प्रतिपादनं ध्वनिविज्ञानेन भवति, तथाश्च शब्दानां शुद्धज्ञानेन मनुष्यः स्वर्गलोकमपि प्राप्नोति। तद्यथा-

**"एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः । सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति" ।।**

ध्वनिविज्ञानस्य उपयोगः विश्वस्य विभिन्नभाषाज्ञानेभ्यः अत्यन्तसहायकः वर्तते। तत्र मूलशब्दस्य (ध्वनिः) ज्ञानं ध्वनिविज्ञानं बिना सम्भवं नास्ति। ध्वनिविज्ञाने मुख्यतः तथ्यत्रयाणां विवेचनं वर्णितम्, तद्यथा-

**(क). विश्लेषणम् (Analysis) (ख). वर्णनम् (Description) (ग).वर्गीकरणम् (Classification)**

**(क). विश्लेषणम्-** अत्र वाग्यन्त्रस्य रचना, तथा तस्य कार्यस्य प्रतिपादनं विद्यते। सूक्ष्मविश्लेषणेन हि वाग्यन्त्रेण ध्वनीनां सूक्ष्मातिसूक्ष्मोच्चारणं सम्भवं भवति।

**(ख). वर्णनम्-** अनेन सहायेन स्थानप्रयत्नस्य बोधं वर्तते। ध्वनेः शुद्ध प्रयत्न स्थानबोधं वर्णनेन सम्भवति।

Cover Page

DOI: http://ijmer.in.doi./2022/11.11.19
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2022); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:11, ISSUE:11(1), November: 2022
Online Copy of Article Publication Available (2022 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd November 2022
Publication Date:10th December 2022
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

**(ग). वर्गीकरणम्-** अत्र मूलभूतध्वनीनां स्थानप्रयत्नानुसारं सूक्ष्मतया विभाजनं वर्णितः।

ध्वनिविज्ञानं भाषायाः शुद्धोच्चारणे शुद्धलेखने वा सहायकः वर्तते। शुद्ध-स्पष्टवैज्ञानिकसङ्केतनिर्माणे च ध्वनिविज्ञानं सहायकं वर्तते। तद्यथा तार-वायरलेस-भौतिकविज्ञाने प्रयुक्तानि ध्वनिसङ्केतानि। ध्वनिविज्ञानं प्राचीनार्वचीनध्वनीनां क्रमिकविकासस्य इतिहासं स्पष्टयति। ध्वनिविज्ञानं परिवर्तन- विकासस्य कारणानि स्पष्टयति। ध्वनिविज्ञानेन विश्वस्य भाषासु यत् परिवर्तनं जातं, तस्य इतिहासं वर्णितः। संस्कृतभाषायाः शब्दाः पालि-अपभ्रंश- प्राकृत- भाषायां कथमेव परिवर्तितः वर्तमानकाले च आसां स्वरूपं किम्? तस्य अवबोधं ध्वनिविज्ञानेन भवति । तद्यथा- सत्यम्- सच, घृतम्- घी, उपाध्यायः- ओझा, उत्थानम्- उठना, विकृतः- विकट, संध्या- साँझ, पृच्छ- पूछना, भक्तः- भात, दुर्लभः- दुल्हा, ग्रामम्- गाँव, कर्म- काम, हस्तः- हाथ, मक्षिका- मक्खी, इत्यादिशब्देषु परिवर्तनं कथं जातम्? तस्य स्पष्टीकरणं ध्वनिविज्ञानेन स्पष्टीकरणं ध्वनिविज्ञानेन स्पष्टयते।

ध्वनिविज्ञानं विभिन्नभाषाणां परस्परं सम्बधान् अपि स्पष्टीकरोति। यथा संस्कृत-आङ्गलभाषायाम्- त्रि- Three, गो- cow, पितृ- Father, मातृ- Mother, भ्रातृ- Brother इत्यादि। ध्वनिविज्ञानं प्रत्येक भाषायाः वैशिष्ट्यानि स्पष्टीकरोति। प्रत्येक भाषायां स्वविशेषता विद्यते। यथा संस्कृतभाषायां टवर्गः विद्यते, परन्तु अन्य भारोपीयभाषासु टवर्गस्य अभावः वर्तन्ते। संस्कृतभाषायां तवर्गः दन्त्यः वर्तते, परन्तु आङ्ग्ल- जर्मन- फ्रेंचभाषायां तवर्गः वर्त्स्यः भवति। फ्रेंचभाषायां 'ञ' ध्वनिः भवति, परन्तु जर्मनभाषायां तस्य अभावः भवति। जर्मनभाषायां 'ख' ध्वनिः विद्यते, परन्तु फ्रेंचभाषायां तस्य अभावः भवति। अत एव इदं स्पष्टीकरणं ध्वनिविज्ञानेन क्रियते। ध्वनिविज्ञानं न केवलं भाषासु वर्णितध्वनीनां स्पष्टीकरणं करोति, अपितु तस्या इतिहासस्य, परिवर्तनस्य, शुद्धरूपस्य ज्ञानम् अपि अवबोधयति। ध्वनिविज्ञानं शुद्धोच्चारणशिक्षया मानवान् सुसभ्य- सुसंस्कृतं च करोति। अत एव प्राचीनभारतदेशे षड्वेदाङ्गानां शिक्षा अर्थात् वर्णध्वनिशिक्षा अत्यावश्यकी आसीत् शिक्षार्थिषु। विश्वस्य विभिन्नासु भाषासु विभिन्ना ध्वनयो भवन्ति। तत्र सापेक्षिकाणि परिवर्तनानि दृश्यन्ते। तत्र ध्वनिपरिवर्तनेषु स्वर- व्यञ्जनानां लोपः, आगमः, विपर्ययाः, समीकरणानि, विषमीकरणानि, स्वतोऽनुनासिकता, मात्राभेदाः, घोषीकरणम्, अघोषीकरणम्, महाप्राणीकरणम्, अल्पप्राणीकरणम्, तथा च अभिश्रुतिः, अभिनिहितिः, अपश्रुतिः इत्याख्यानि विशिष्टानि ध्वनिपरिवर्तनानि समाविशन्ति। वस्तुतः भाषाविज्ञाने ध्वनिविज्ञानस्य महत्त्वपूर्णं स्थानमस्ति। अस्य सम्बन्धः भाषायाः भौतिकाधारध्वनिना सह अस्ति। सर्वविदितमस्ति

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2022); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:11, ISSUE:11(1), November: 2022
Online Copy of Article Publication Available (2022 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd November 2022
Publication Date:10th December 2022
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

Cover Page

DOI: http://ijmer.in.doi./2022/11.11.19
www.ijmer.in

यत् सर्वाभाषाः परिवर्तनशीलाः सन्ति तत्र परिवर्तनानुशीलने ध्वनिविज्ञानस्य उपयोगिता भवति एव।

सन्दर्भ –

1. डॉ.कपिलदेव द्विवेदी,भाषा-विज्ञान एवं भाषा-शास्त्र, विश्वविद्यालयय प्रकाशन वाराणसी
2. डॉ. कर्णसिंह, भाषाविज्ञान, साहित्य भण्डार प्रकाशन मेरठ
3. डॉ. मोतीलाल गुप्त,भाषा-विश्लेषण, चौखम्बा विद्याभवन वाराणसी
4. प्रो० अशोकचन्द्रगौड़शास्त्री ,संस्कृत भाषावैज्ञानिकप्रबन्धमुक्तावली, राष्ट्रियसंस्कृतसंस्थानम् (नवदेहली)